# Code No. 1505

**CLASS : 11th (Eleventh)** **Series : 11-April/2021**

*रोल नं०* ☐☐☐☐☐☐☐☐☐☐

## संस्कृत

(Only for Fresh/School Candidates)

*समय : $2\frac{1}{2}$ घण्टे ]* *[ पूर्णांक :* ***80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **17** हैं।*
- *प्रश्न-पत्र में सबसे ऊपर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/ पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

www.MsEducationTv.com

***निर्देशः —***

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

## खण्डः 'क'
## (पठितावबोधन-खण्डम्)

**1.** विकासः विद्यालयस्य विषये मित्रं प्रति पत्रमेकम् लिखति। मञ्जूषापदैः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत – $1 \times 6 = 6$

परीक्षाभवनम्

तिथिः

प्रियमित्र अभिनव !

सस्नेहं नमस्ते।

अत्र कुशलम् (i) ............। अहं स्वविद्यालयस्य (ii) ............ करोमि। मम (iii) ............ भवनम् अतीव विशालम् सुन्दरम् चास्ति। अस्य परीक्षा (iv) ............ शोभनः आगच्छति। अध्यापकाः (v) ............ च अनुशासनप्रियाः सन्ति।

मातृपितृचरणयोः मम प्रणामाः निवेदनीयाः।

भवदीयः मित्रम्

(vi) ............।

*मञ्जूषा*

| |
|---|
| **विकासः, छात्राः, तत्रास्तु, विद्यालयस्य, वर्णनम्, परिणामः।** |

www.MsEducationTV.com

**2.** अधोलिखितगद्यांशं पठित्वा प्रश्नोत्तराणि संस्कृतेन एकपदेन लिखत – $1 \times 3 = 3$

उष्णमश्नीयात्, उष्णं हि भुज्यमानं स्वदते, भुक्तं चाग्निमौदर्यमुदीरयति, क्षिप्रं जरां गच्छति, वातमनुलोमयति, श्लेष्माणं च परिह्रासयति, तस्मादुष्णमश्नीयात्।

(क) कीदृशम् अश्नीयात् ?

(ख) उष्णं भुज्यमानं कदा जरां गच्छति ?

(ग) उष्णं भुज्यमानं वातम् किं करोति ?

**3.** अधोलिखितश्लोकं पठित्वा प्रश्नोत्तराणि संस्कृतेन एकपदेन लिखत – $1 \times 2 = 2$

पतितैः पतमानैश्च पादपस्थैश्च मारुतः।

कुसुमैः पश्य सौमित्रे ! क्रीडन्निव समन्ततः।।

(क) मारुतः क्रीडन् इव कैः अवलोक्यते ?

(ख) अत्र 'सौमित्रे' इति सम्बोधनं कस्मै वर्तते ?

**4.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $1 \times 3 = 3$

(क) <u>ज्योतिषां</u> ज्योतिः मनः कश्यते।

(ख) शिशिर्तौ सरितः <u>तीरैः</u> भान्ति।

(ग) आकाशे अकाला अपि <u>मेघाः</u> प्रादुर्भवन्।

**5.** अधोलिखितप्रश्नानां प्रदत्तोत्तरविकल्पेषु एकं शुद्धविकल्पं विचित्य उत्तरपुस्तिकायां लिखत – $1 \times 17 = 17$

(क) 'घटना + एका' अत्र किं सन्धिपदम् ?

(i) घटनाका (ii) घटनैका

(iii) घटनका (iv) घटका

(ख) 'तत् + निकटे' अत्र किं सन्धिपदम् ?

(i) तन्निकटे (ii) तत्कटे

(iii) तनिके (iv) तन्कटे

(ग) 'इहैव' अत्र किं सन्धिच्छेदपदम् ?

(i) इ + व (ii) इहै + व

(iii) इह + एव (iv) एहि + व

(घ) 'भासुरास्ते' अत्र का सन्धिः ?

(i) दीर्घसन्धिः (ii) गुणसन्धिः

(iii) व्यञ्जनसन्धिः (iv) विसर्गसन्धिः

www.MsEducationTv.com

(ङ) 'वनानाम् अन्ताः' अत्र किं समस्तपदम् ?

(i) वनान्ताः (ii) वनतः

(iii) वह्नितः (iv) वहितः

(च) 'पूर्वम् अनतिक्रम्य' अत्र किं समस्तपदम् ?

(i) पूर्वतिक्रम्य (ii) पूर्वयथाम्

(iii) यथापूर्वम् (iv) पूर्वयथा

(छ) 'अपरिणतम्' अत्र कः समासः ?

(i) नञ्तत्पुरुषः (ii) कर्मधारयः

(iii) द्वन्द्वः (iv) अव्ययीभावः

(ज) 'वर्णप्रसादम्' अत्र किं विग्रहपदम् ?

(i) वर्णम् प्रसादे (ii) वर्णस्य प्रसादम्

(iii) वर्ण प्रसादे (iv) वर्ण प्रासादे

(झ) 'ज्वालानुगतेन मारुतेन' अत्र किम् विशेषणपदम् ?

(i) ज्वाला (ii) गतेन

(iii) ज्वालानुगतेन (iv) मारुतेन

(ञ) 'सलिलतीरवासिनः पक्षिणः' अत्र किम् विशेषणपदम् ?

(i) सलिल (ii) वासिनः

(iii) पक्षिणः (iv) सलिलतीरवासिनः

(ट) 'निशितः खड्गः' अत्र किम् विशेष्यपदम् ?

(i) निशा (ii) तः

(iii) निशितः (iv) खड्गः

www.MsEducationTv.com

(ठ) 'अदीनाः' इति पदस्य विलोमपदं किम् ?

(i) अदेवः (ii) दीनाः

(iii) प्रदीपः (iv) प्रमुखः

(ड) 'जल्पन्' इति पदस्य विलोमपदं किम् ?

(i) अजल्पन् (ii) रूपम्

(iii) प्रियम् (iv) देवम्

(ढ) 'पर्जन्यः' अत्र किम् पर्यायपदम् ?

(i) खगः (ii) मेघः

(iii) रूपः (iv) धनः

(ण) 'कालः' अत्र किं पर्यायपदम् ?

(i) रूपः (ii) देवः

(iii) समयः (iv) रामः

(त) 'पतमानः' इति पदे कः प्रत्ययः ?

(i) क्त्वा (ii) शानच्

(iii) शतृ (iv) क्त

(थ) 'रक्ष् + तुमुन्' संयोगे किं रूपम् ?

(i) रक्षितः (ii) रक्षितवान्

(iii) रक्षितुम् (iv) रक्षिता

**6.** प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिप्रयोगं कुरुत – $1 \times 3 = 3$

(क) ........... परितः वृक्षाः सन्ति। (गृहम्/गृहे)

(ख) मोहनः ........... सह क्रीडति। (मित्रैः/मित्रात्)

(ग) ............ नमः। (देवस्य/देवाय)



www.MsEducationTV.com

**7.** यथानिर्दिष्टशब्दरूपाणि लिखत – $1 \times 3 = 3$

(क) 'राम' शब्दस्य प्रथमा द्विवचने।

(ख) 'गुरु' शब्दस्य चतुर्थी एकवचने।

(ग) 'नदी' शब्दस्य प्रथमा बहुवचने।

**8.** यथानिर्दिष्टधातुरूपाणि लिखत – $1 \times 3 = 3$

(क) 'भू' धातुः लङ्लकारस्य प्रथमपुरुषस्य एकवचने।

(ख) 'गम्' धातुः लट्लकारस्य उत्तमपुरुषस्य एकवचने।

(ग) 'अस्' धातुः लट्लकारस्य प्रथमपुरुषस्य द्विवचने।

**9.** प्रदत्तछन्दस्सु ***एकस्य*** लक्षणोदाहरण संस्कृतभाषया लिखत – 3

(क) इन्द्रवज्रा।

(ख) उपेन्द्रवज्रा।

(ग) अनुष्टुप्।

**10.** प्रदत्तालंकारेषु ***एकस्य*** लक्षणोदाहरणं संस्कृतभाषया लिखत – 3

(क) यमकः।

(ख) अनुप्रासः।

(ग) उपमा।

**खण्डः 'ख'**

**(रचनात्मकलेखन-खण्डम्)**

**11.** प्रदत्तकविषु ***एकस्य*** परिचयं हिन्दीभाषया लिखत – 5

(क) अरविन्दघोषः।

(ख) आयुर्वेदाचार्यः चरकः।

(ग) महर्षिः वाल्मीकिः

www.MsEducationTv.com

**12.** प्रदत्तपुस्तकेषु ***एकस्य*** परिचयं हिन्दीभाषया लिखत – 5

(क) गीताञ्जलिः।

(ख) रामायणम्।

(ग) चरकसंहिता।

**13.** अधोलिखितगद्यांशस्य सप्रसंग-सरलार्थं हिन्दीभाषया लिखत - 5

अथ तस्य महात्मनः पुण्योपचयात् सत्याधिष्ठानबलात् च समन्ततः तोयपरिपूर्णाः गम्भीरमधुरनिर्घोषा अकाला अपि कालमेघाः विद्युल्लताऽलङ्कृता प्रादुरभवन्।

**अथवा**

किञ्च यदि मन्यसे तदा निर्भयस्थानं त्वां प्रापयामि। यवन उवाच - राजन् मैवं ब्रूहि।

www.MSEducationTv.com

**14.** अधोलिखितश्लोकस्य सप्रसंग-सरलार्थं हिन्दीभाषया लिखत - 5

जलं प्रसन्नं कुसुमप्रहासं क्रौञ्चस्वनं शालिवनं विपक्वम्।
मृदुश्च वायुर्विमलश्च चन्द्रः शंसन्ति वर्षव्यपनीतकालम्।।

**अथवा**

सङ्गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सञ्जानाना उपासते।।

**15.** प्रदत्तसूक्तिषु ***एकस्य*** भावार्थं हिन्दीभाषया लिखत – 2

(क) अदीनाः स्याम शरदः शतम्।

(ख) शृण्वन्तु ये पञ्चनदेषु शूराः।

(ग) दयालुः पुरुषः श्रेष्ठः सर्वजन्तूपकारकः।

**16.** स्वरसन्धेः ***अथवा*** विसर्गसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**17.** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 5 = 10$

संस्कृतभाषा विश्वस्य सर्वासु भाषासु प्राचीनतमा अस्ति। अस्याः साहित्यम् समृद्धमस्ति। संसारस्य प्राचीनतमाः ग्रन्थाः चत्वारः वेदाः संस्कृतभाषायां विद्यन्ते। अस्माकं संस्कृतिः संस्कृताश्रिताः वर्तते। अस्यामेव अस्माकम् भूतं भविष्यञ्च सन्निहितम् अस्ति।

(क) संस्कृतभाषा विश्वस्य सर्वासु भाषासु कीदृशी अस्ति ?

(ख) संस्कृतस्य साहित्यं कीदृशं वर्तते ?

(ग) वेदाः कति सन्ति ?

(घ) अस्माकं का संस्कृताश्रिता वर्तते ?

(ङ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।

www.MsEducationTv.com